# कक्ष्या - VIII

प्रश्नसञ्चयः अक्कादमिक - संस्कृतविद्यालयानां कृते (Part I)

# एककम् - ३ जगदेतत् प्रकाशते

## पाठः ५ लोकशङ्करः

**1. प्रश्ननिर्देशः।**

कोष्ठकात् चित्वा लिखतु।

**प्रश्नपाठः - 1**

किं गणे नान्तर्भवति?

(उपनिषद्भाष्यम्, भगवद्गीताभाष्यम्, महाभाष्यम्)

**पाठ्यचर्योद्देश्यम्।**

देशीयैक्यप्रवर्धिकाः रचनाः परिचिनोति।

**मानसिकव्यापारः**

आशयग्रहणं, विवेचनम्।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** विविच्यलेखनाय एकः अङ्कः।

**उत्तरम् -** महाभाष्यम् - 1

**प्रश्नपाठः - 2**

अधो दत्तेषु महावाक्यं किम्? (सत्यं वद, तत्त्वमसि, मातृदेवो भव)

**पाठ्यचर्योद्देश्यम्।**

देशीयैक्यप्रवर्धिकाः रचनाः परिचिनोति।

**मानसिकव्यापारः**

आशयग्रहणम्, आशयावबोधः।

| | | |
|---|---|---|
| समयः | - | 1 निमेषः |
| अङ्कः | - | 1 |

**मूल्यनिर्णयसूचकाः** विविच्यलेखनाय एकोऽङ्कः।

**उत्तरम् -** तत्त्वमसि।

## 3. प्रश्ननिर्देशः।

सूचनाः अनुसृत्य जीवनचरितं लिखत।

**प्रश्नपाठः - 3**

| | | |
|---|---|---|
| नाम | - | मोहन्दास् करंचन्द् गान्धी |
| जन्म | - | 1869 ओक्टोबर् 2 |
| जन्मस्थानम् | - | पोर्बन्दर् |
| माता | - | पुत्तली भायी |
| पिता | - | करंचन्द्गान्धी |
| विद्याभ्यासः | - | नियमबिरुदधारी |
| वृत्तिः | - | न्यायवादी |
| कर्ममण्डलम् | - | स्वातन्त्र्यसमरसेनानी, सामूह्यपरिष्कर्ता |
| ग्रन्थाः | - | एन्टे सत्यान्वेषणपरीक्षकल्, अनासक्तियोगः (गीताव्याख्यानम्) |
| मरणम् | - | 1948 |

**पाठ्यचर्योद्देश्यम्।**

महात्मनां योगदानमधिकृत्य ज्ञानम्।

**मानसिकव्यापारः**

आशयग्रहणं, क्रोडीकरणम्।

| | | |
|---|---|---|
| समयः | - | 12 निमेषाः |
| अङ्काः | - | 5 |

| | | | |
|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | सूचनानां स्वीकरणाय | - | 2 |
| | आशयपूर्णतायै | - | 2 |
| | क्रमीकृत्य लेखनाय | - | 1 |
| | **आहत्य** | **-** | **5** |

## 4. प्रश्ननिर्देशः।

यथोचितं योजयत।

### प्रश्नपाठः - 4

महावाक्यम्, उपनिषत् इति क्रमेण योजयत।

प्रज्ञानं ब्रह्म, छान्दोग्योपनिषद्, तत्त्वमसि, बृहदारण्यकोपनिषत्, माण्डूक्योपनिषत्, अहं ब्रह्मास्मि, ऐतरेयोपनिषत्, अयमात्मा ब्रह्म।

### पाठ्यचर्योद्देश्यम्।

महात्मभिः आविष्कृताः चिन्ताधाराः अधिकृत्य ज्ञानम्।

### मानसिकव्यापारः

आशयग्रहणं, विवेचनम्।

| | | |
|---|---|---|
| समयः | - | 8 निमेषाः |
| अङ्काः | - | 4 |

**मूल्यनिर्णयसूचकाः** उचितरीत्या योजनाय एकैकोऽङ्कः।

| **उत्तरम् -** | ***महावाक्यम्*** | ***उपनिषत्*** |
|---|---|---|
| | प्रज्ञानं ब्रह्म | छान्दोग्योपनिषद् |
| | तत्त्वमसि | बृहदारण्यकोपनिषत् |
| | अहं ब्रह्मास्मि | माण्डूक्योपनिषत् |
| | अयमात्मा ब्रह्म | ऐतरेयोपनिषत् |

## 5. प्रश्ननिर्देशः।

वेदाः वेदाङ्गानि च विविच्य पट्टिकारूपेण लिखत।

**प्रश्नपाठः - 5**

शिक्षा, साम, व्याकरणं, यजुः, ऋक्, कल्पं, अथर्व, निरुक्तम्

**पाठ्यचर्योद्देश्यम्।**

महात्मभिः आविष्कृताः चिन्ताधाराः अधिकृत्य ज्ञानम्।

**मानसिकव्यापारः**

आशयग्रहणं, विवेचनम्।

समयः - 6 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः** उचितरीत्या लेखनाय एकैकस्य अर्धाङ्कः।

## 6. प्रश्ननिर्देशः।

प्रादेशिकभाषया परिवर्तयतु।

**प्रश्नपाठः - 6**

मातुः मरणानन्तरं श्रीशङ्करः उत्तरान् देशान् अगच्छत्। सः काश्मीरदेशं प्राप्तवान्। तत्र विख्यातं शारदादेवीक्षेत्रम् आसीत्। तत्र प्रवेष्टुं काचन व्यवस्था आसीत्। पण्डितानां चोद्यानाम् उत्तराणि यः वदति सः एव क्षेत्रं प्रवेष्टुम् अर्हः भवति।

**पाठ्यचर्योद्देश्यम्।**

भाषान्तरीकरणसामर्थ्यं सम्पादयति।

**मानसिकव्यापारः**

आशयावबोधः, आशयप्रकटनं, मातृभाषायाः समानपदचयनम्।।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** एकैकस्य वाक्यस्य एकैकोऽङ्कः।

## 7. प्रश्ननिर्देशः।

कथास्तम्भं क्रमीकरोतु।

**प्रश्नपाठः - 7**

- हे ब्रह्मन् देहं वा आत्मानं वा दूरम् अपसारयितुम् इच्छति।
- कदाचित् शङ्करः शिष्यैः सह काशीं प्राप।
- "दूरं अपसर" शङ्करः अवदत्।
- कश्चन चण्डालः चतुर्भिः शुनकैः साकं तत्र आगतः।
- व्याधस्य प्रत्युत्तरेण अद्वैतधर्ममधिगम्य शङ्करः व्यासतीर्थं प्राप।

**पाठ्यचर्योद्देश्यम्।**

महात्मनां चिन्ताधाराः दर्शनानि च देशीयैक्यप्रवर्धने सहायकानि भवन्ति।

**मानसिकव्यापारः**

आशयावबोधः, क्रमीकरणम्।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** उचितरीत्या क्रमीकरणाय पञ्चाङ्काः।

**उत्तरम् -**

- कदाचित् शङ्करः शिष्यैः सह काशीं प्राप।
- कश्चन चण्डालः चतुर्भिः शुनकैः साकं तत्र आगतः।
- "दूरं अपसर" शङ्करः अवदत्।
- हे ब्रह्मन् देहं वा आत्मानं वा दूरम् अपसारयितुम् इच्छति।
- व्याधस्य प्रत्युत्तरेण अद्वैतधर्ममधिगम्य शङ्करः व्यासतीर्थं प्राप।

## 8. प्रश्ननिर्देशः।

यथोचितं योजयत।

**प्रश्नपाठः - 8**

| *अ* | | *अ* |
| --- | --- | --- |
| न्यायम् | - | पतञ्जलिः |
| वैशेषिकम् | - | प्रस्थानत्रयम् |
| योगम् | - | श्रीशङ्कराचार्यः |
| भगवद्गीता | - | कणादः |
| अद्वैतमतम् | - | गौतमः |
| | - | पाणिनिः। |

**पाठ्यचर्योद्देश्यम्।**

महात्मभिः आविष्कृताः चिन्ताधाराः अधिकृत्य ज्ञानम्।

**मानसिकव्यापारः**

आशयग्रहणं, विवेचनम्।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** उचितरीत्या योजनाय एकैकोऽङ्कः।

**उत्तरम् -**

| | | |
| --- | --- | --- |
| न्यायम् | - | गौतमः |
| वैशेषिकम् | - | कणादः |
| योगम् | - | पतञ्जलिः |
| भगवद्गीता | - | प्रस्थानत्रयम् |
| अद्वैतमतम् | - | श्रीशङ्कराचार्यः। |

## 9. प्रश्ननिर्देशः।

प्रादेशिकभाषया परिवर्तयतु।

**प्रश्नपाठः - 9**

नास्तिक आस्तिकभेदेन दर्शनानि द्विविधानि। यानि वेदप्रामाण्यम् अङ्गीकुर्वन्ति तानि आस्तिकदर्शनानि। यानि वेदप्रामाण्यं न अङ्गीकुर्वन्ति तानि नास्तिकदर्शनानि। सांख्यं योगञ्च आस्तिकदर्शनेषु अन्तर्भवतः। बौद्धं चार्वाकञ्च नास्तिकदर्शनेषु अन्तर्भवतः।

**पाठ्यचर्योद्देश्यम्।**

भाषान्तरीकरणसामर्थ्यं सम्पादयति।

**मानसिकव्यापारः**

आशयावबोधः, आशयप्रकटनं, मातृभाषायां समानपदचयनम्।।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** एकैकस्य वाक्यस्य एकैकोऽङ्कः।

# पाठः ६ भारतं महीयते

## 1. प्रश्ननिर्देशः।

यथोचितं योजयत।

**प्रश्नपाठः - 1**

| *अ* | | *आ* |
|---|---|---|
| वाल्मीकिः | - | रघुवंशम् |
| व्यासः | - | दूतवाक्यम् |
| भासः | - | रामायणम् |
| कालिदासः | - | भगवद्गीता |
| | - | नारायणीयम् |

**पाठ्यचर्योद्देश्यम्।**

देशीयैक्यप्रवर्धिकाः रचनाः परिचिनोति।

**मानसिकव्यापारः**

आशयापग्रथनं, विवेचनम्।

समयः - 6 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः** यथोचितयोजनाय एकैकोऽङ्कः।

**उत्तरम् -** वाल्मीकिः - रामायणम्

व्यासः - भगवद्गीता

भासः - दूतवाक्यम्

कालिदासः - रघुवंशम्।

## 2. प्रश्ननिर्देशः।

यथोचितं योजयत।

**प्रश्नपाठः - 2**

| | | |
|---|---|---|
| रघुवंशम् | - | रामकथा |
| भगवद्गीता | - | रघोः वंशम् |
| दूतवाक्यम् | - | तत्त्वशास्त्रम् |
| रामायणम् | - | पाण्डवदूतः |
| | - | खण्डकाव्यम्। |

### पाठ्यचर्योद्देश्यम्।

देशीयैक्यप्रवर्धिकाः रचनाः परिचिनोति।

### मानसिकव्यापारः

अपग्रथनं, विवेचनम्।

समयः - 6 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः** यथोचितयोजनाय एकैकोऽङ्कः।

**उत्तरम् -** रघुवंशम् - रघोः वंशम्

भगवद्गीता - तत्त्वशास्त्रम्

दूतवाक्यम् - पाण्डवदूतः

रामायणम् - रामकथा

## 3. प्रश्ननिर्देशः।

पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

**प्रश्नपाठः - 3**

“आदिमं काव्यं रघुरामस्य चरितं हि।
वाल्मीकिप्रकीर्तितं काव्येषु महत्तरम्।।
ऐतिहासिकं व्यसभारतं विश्वोत्तरम्।
ऐहिकमामुष्मिकं सर्वमत्रास्ति नूनम्।।”

1. आदिमं काव्यं कस्य चरितं भवति?
2. व्यासेन कृतं महाभारतं कीदृशं भवति?
3. सर्वमत्रास्ति - पदच्छेदं कथम्?
4. अमुष्मिन् भवम् इत्यर्थे प्रयुक्तम् एकं पदं श्लोकादुद्धृत्य लिखत?

**पाठ्यचर्योद्देश्यम्।**

पद्यांशं पठित्वा आशयावबोधः।

**मानसिकव्यापारः**

आशयापग्रथनं, विवेचनम्।

समयः - 8 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः** उचितस्य एकैकस्य उत्तरस्य एकैकोऽङ्कः।

**उत्तरम् -**
1. रघुरामस्य।
2. विश्वोत्तरम्।
3. सर्वम् + अत्र + अस्ति।
4. आमुष्मिकम्।

## 4. प्रश्ननिर्देशः, प्रश्नपाठश्च।

‘भारतं महीयते’ इति पाठभागे प्रतिपादितानां त्रयाणां ग्रन्थानां नाम लिखत।

**पाठ्यचर्योद्देश्यम्।**

महात्मनां योगदानमधिकृत्य ज्ञानम्।

**मानसिकव्यापारः**

अपग्रथनं, स्मरणम्।

समयः - 2 निमेषौ।

अङ्काः - 3

**मूल्यनिर्णयसूचकाः** उचितस्य एकैकस्य उत्तरस्य एकैकोऽङ्कः।

**उत्तरम् -** रामायणम्, महाभारतम्, भगवद्गीता

## 5. प्रश्ननिर्देशः।

उदाहरणानुसारं पदच्छेदं लिखत।

**प्रश्नपाठः - 5**

उदा - सर्वेष्वन्यतमं - सर्वेषु + अन्यतमम्।

काव्येष्वादिमम्।

**पाठ्यचर्योद्देश्यम्।**

सन्धिज्ञानसम्पादनम्।

**मानसिकव्यापारः**

अपग्रथनं, विघटनम्।

समयः - 2 निमेषौ।

अङ्काः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य एकैकस्य उत्तरस्य एकैकोऽङ्कः।

**उत्तरम् -** काव्येषु + आदिमम्।

# एककम् - ४ कर्मैव समाराधना

# पाठः ७ न निश्चितार्थाद् विरमन्ति धीराः

## 1. प्रश्ननिर्देशः।

उदाहरणानुसारम् एकं पदं लिखत।

**प्रश्नपाठः - 1**

उदाः - जह्नोः अपत्यं स्त्री - जाह्नवी। एवं चेत्।

भगीरथस्य अपत्यं स्त्री - ............................।

**पाठ्यचर्योद्देश्यम्।**

समस्तपदं जानाति।

**मानसिकव्यापारः**

आशयापग्रथनं, तारतम्यम्।

समयः - 2 निमेषाः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** समस्तपदलेखने एकः अङ्कः।

**उत्तरम्** - भागीरथी।

## 2. प्रश्ननिर्देशः, प्रश्नपाठश्च।

यद्यपि - तथापि उपयुज्य उदाहरणानुसारं वाक्यं परिवर्तयत।

उदाः - सः धनिकः भवति। दरिद्रः इव जीवति।

यद्यपि सः धनिकः तथापि दरिद्रः इव जीवति।

समुद्रे प्रभूतं जलम् अस्ति। तत् पेयं न भवति।

**पाठ्यचर्योद्देश्यम्।**

अव्ययानां प्रयोगपरिचयः।

**मानसिकव्यापारः**

अपग्रथनम्, आशयावबोधः।

समयः - 4 निमेषाः

अङ्कौ - 2

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य अङ्कद्वयम्।

**उत्तरम् -** यद्यपि समुद्रे प्रभूतं जलमस्ति तथापि तत् पेयं न भवति।

## 3. प्रश्ननिर्देशः।

सूचनां पठित्वा जीवनचरितं लिखत।

**प्रश्नपाठः - 3**

सूचनाः - ईश्वरचन्द्रविद्यासागरः - सामूहिकपरिष्कर्ता - संस्कृतपण्डितः - पत्रकारः - लेखकः - 1820 तमे वर्षे जननम् - नियमबिरुदधारी - स्त्रीशिक्षा - विधवाविवाहः - बहुभार्यात्वनिरोधः - रघुवंशं, किरातार्जुनीयं - अभिज्ञानशाकुन्तलम् आदीनां व्याख्याता - 1891 तमे वर्षे मरणम्।

**पाठ्यचर्योद्देश्यम्।**

प्रयत्नधनान् महात्मनः अधिकृत्य ज्ञानसम्पादनम्।

**मानसिकव्यापारः**

विषयावबोधः, अपग्रथनं, क्रोडीकरणम्।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः**

| | | |
|---|---|---|
| सूचनानां स्वीकाराय | - | 2 |
| आशयपूर्णतायै | - | 2 |
| क्रमीकृत्य लेखनाय | - | 1 |
| **आहत्य** | **-** | **5** |

## 4. प्रश्ननिर्देशः।

प्रादेशिकभाषया परिवर्तयत।

**प्रश्नपाठः - 4**

दरिद्रपरिवारात् अत्युन्नतपदवीं प्राप्तोऽयं के.आर्. नारायणन् महाशयः। अयं कोट्टयं जिल्लायाम् उऴवूर् ग्रामे जनिम् अलभत। सः शासनतन्त्रज्ञः आसीत्। तथा ग्रन्थकारः विद्याभ्यासविचक्षणः वाग्मी च आसीत्। महापुरुषोऽयं पञ्चोत्तरद्विसहस्रतमे वर्षे दिवंगतः।

**पाठ्यचर्योद्देश्यम्।**

प्रयत्नधनान् महात्मनः अधिकृत्य ज्ञानसम्पादनम्।

**मानसिकव्यापारः**

विषयावबोधः, अपग्रथनं, मातृभाषायां समानपदचयनम्।

समयः - 10 निमेषाः

अङ्कः - 5

**मूल्यनिर्णयसूचकाः** एकैकस्य वाक्यस्य एकैकोऽङ्कः।

## 5. प्रश्ननिर्देशः।

कथास्तम्भक्रमीकरणम्।

**प्रश्नपाठः - 5**

क. भगीरथस्य निरन्तरयत्नं ज्ञात्वा जह्नुमहर्षिः गङ्गां मोचितवान्।

ख. गङ्गा जाह्नवीति ख्याता बभूव।

ग. जहनुमहर्षेः आश्रमं प्राप्ता मन्दाकिनी महर्षेः आश्रमं जले निमज्जयामास।

घ. एतत् दृष्ट्वा दुःखितः भगीरथः जह्नुमहर्षिं प्रार्थितवान्।

ङ. कुपितः मुनिः गङ्गाम् अपिबत्।

**पाठ्यचर्योद्देश्यम्।**

आशयं क्रमीकृत्य कथारूपेण लेखनसामर्थ्यम्।

**मानसिकव्यापारः**

अपग्रथनं, क्रमीकरणम्।

समयः - 8 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** अनुक्रमलेखनाय - 5

**उत्तरम् -**

क. जह्नुमहर्षेः आश्रमं प्राप्ता मन्दाकिनी महर्षेः आश्रमं जले निमज्जयामास।

ख. कुपितः मुनिः गङ्गाम् अपिबत्।

ग. एतत् दृष्ट्वा दुःखितः भगीरथः जह्नुमहर्षिं प्रार्थितवान्।

घ. भगीरथस्य निरन्तरयत्नं ज्ञात्वा जह्नुमहर्षिः गङ्गां मोचितवान्।

ङ. गङ्गा जाह्नवीति ख्याता बभूव।

## 6. प्रश्ननिर्देशः।

सूचनाः उपयुज्य कथां विपुलीकरोतु।

### प्रश्नपाठः - 6

सूचनाः - कश्चन शाल्मलीवृक्षः - वानरः - वसति स्म - चपलः - अलसः। एका चटका - नीडनिर्माणम् उपहसति स्म - सा नीडनिर्माणे व्यापृता - वर्षा समायता - शीतेन कम्पितः - चटकायाः - भाषणम् - वानरः लज्जितः।

### पाठ्यचर्योद्देश्यम्।

कथालेखनसामर्थ्यसम्पादनम्।

### मानसिकव्यापारः

अपग्रथनम्, आशयविपुलीकरणम्।

समयः - 10 निमेषाः

अङ्काः - 5

| | | |
|---|---|---|
| **मूल्यनिर्णयसूचकाः** सूचनानां स्वीकरणाय | - | 2 |
| विपुलीकरणाय | - | 2 |
| कथा स्वरूपाय | - | 1 |
| **आहत्य** | - | **5** |

## 7. प्रश्ननिर्देशः।

प्रधानकर्म अप्रधानकर्म च विवेचयत।

**प्रश्नपाठः - 7**

गोपालः रामं पुस्तकं याचते।

**पाठ्यचर्योद्देश्यम्।**

प्रधान अप्रधानकर्म विवेचनम्।

**मानसिकव्यापारः**

अपग्रथनं, विवेचनं च।

समयः - 4 निमेषाः

अङ्कः - 2

**मूल्यनिर्णयसूचकाः** एकैकस्य एकैकोऽङ्कः।

**उत्तरम् -** प्रधानकर्म - पुस्तकम्

अप्रधानकर्म - रामम्।

## 8. प्रश्ननिर्देशः, प्रश्नपाठश्च।

सम्भाषणं पूरयत।

सीता - नमस्ते रमे! ..................... गच्छसि?

रमा - नमस्ते। अहं मातुलगृहं .....................।

सीता - ..................... विशेषः?

रमा - मातामह्याः जन्मदिनम्।

सीता - कतमः? ..................... अस्ति वा?

रमा - षष्ठी। आम्। सद्या अस्ति।

सीता - .....................।

**पाठ्यचर्योद्देश्यम्।**

रचनापाटवं, सम्भाषणचातुर्यं च।

**मानसिकव्यापारः**

आशयावबोधः, आशयप्रकटनम्।

समयः - 8 निमेषाः

अङ्कः - 5

**मूल्यनिर्णयसूचकाः** एकैकस्य एकैकोऽङ्कः।

**उत्तरम् -** अ. कुत्र।

आ. गच्छामि।

इ. कः विशेषः।

ई. सद्या।

उ. पुनर्मिलावः।

## 9. प्रश्ननिर्देशः।

प्रधानकर्म विवेचयत।

**प्रश्नपाठः - 9**

'भगीरथः जाह्नवीं' तां पातालम् अनयत्।

**पाठ्यचर्योद्देश्यम्।**

द्विकर्मकधातुप्रयोगपरिचयसम्पादनम्।

**मानसिकव्यापारः**

अपग्रथनं, विवेचनं च।

समयः - 4 निमेषाः

अङ्कः - 2

**मूल्यनिर्णयसूचकाः** एकैकस्य एकैकोऽङ्कः।

**उत्तरम् -** जाह्नवीम्।

## 10. प्रश्ननिर्देशः।

उदाहरणानुसारम् एकं पदं लिखत।

**प्रश्नपाठः - 10**

उदाः - भगीरथस्य अपत्यं स्त्री - भागीरथी। एवं चेत्।

जनकस्य अपत्यं स्त्री - ..................।

**पाठ्यचर्योद्देश्यम्।**

समस्तपदानां विवेचनम्।

**मानसिकव्यापारः**

अवगमनं, विवेचनं, तारतम्यम्।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** एकैकस्य एकैकोऽङ्कः।

**उत्तरम् -** जानकी।

# पाठः ८ उद्योगी लभते श्रियम्

## 1. प्रश्ननिर्देशः।

श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

**प्रश्नपाठः - 1**

"रत्नैर्महाब्धेः तुतुषुर्न देवाः
न लेभिरे भीमविषेण भीतिम्।
सुधां विना न प्रययुर्विरामं
न निश्चितार्थात् विरमन्ति धीराः।।"

(सुधां - अमृतम्)

1. के महाब्धेः रत्नैः न तुतुषुः?
2. देवा केन भीतिं न भेजिरे?
3. कां विना देवाः विरामं न प्रययुः?
4. अत्र सूचिता कथा का?
5. तुतुषुर्न इति पदस्य पदच्छेदं लिखत।

**पाठ्यचर्योद्देश्यम्।**

श्लोकं पठित्वा आशयम् अवगच्छति।

**मानसिकव्यापारः**

आशयापग्रथनं, विवेचनम्।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** एकैकस्य प्रश्नस्य एकैकोऽङ्कः।

**उत्तरम् -**

1. देवाः।
2. भीमविषेण।
3. सुधां विना।
4. समुद्रमथनम्।
5. तुतुषुः + न।

## 2. प्रश्ननिर्देशः।

अधो दत्तेषु प्रयत्नस्य महत्वप्रतिपादकं सुभाषितं लिखत।

**प्रश्नपाठः - 2**

1. योजनानां सहस्रं तु शनैर्गच्छेत् पिपीलिका
   अचलत् वैनतेयोऽपि पदमेकं न गच्छति।

2. विद्या विनयसम्पन्ने ब्राह्मणे गवि हस्तिनि
   शुनि चैव श्वपाके च पण्डिताः समदर्शिनः।।

**पाठ्यचर्योद्देश्यम्।**

प्रयत्नस्य महत्वप्रतिपादकानां सुभाषितानां ज्ञानम्।

**मानसिकव्यापारः**

अर्थावबोधः, विवेचनम्।

समयः - 4 निमेषाः

अङ्कौ - 2

**मूल्यनिर्णयसूचकाः** विविच्यलेखनम्।

**उत्तरम् -** योजनानां सहस्रं तु शनैर्गच्छेत् पिपीलिका अचलत् वैनतेयोऽपि पदमेकं न गच्छति।

## 3. प्रश्ननिर्देशः, प्रश्नपाठश्च।

"धीराः निश्चितात् कार्यात् न प्रतिनिवृत्तन्ति" एतदाशययुक्तं सुभाषितं लिखत।

**पाठ्यचर्योद्देश्यम्।**

उचितसुभाषितानां चयनम्।

**मानसिकव्यापारः**

स्मरणम्, आशयग्रहणम्।

समयः - 4 निमेषाः

अङ्कौ - 2

**मूल्यनिर्णयसूचकाः** निर्दिष्टाशययुक्तस्य पद्यस्य लेखनाय अङ्कद्वयम्।

**उत्तरम् -** रत्नैर्महाब्धेःस्तुतुषुर्न देवाः
न लेभिरे भीमविषेण भीतिम्।
सुधां विना न प्रययुर्विरामम्
न निश्चितार्थाद्विरमन्ति धीराः।।

## 4. प्रश्ननिर्देशः।

प्रयत्नस्य महत्वप्रतिपादकम् एकं सुभाषितम् अधः दत्तम्। तत्र रिक्तस्थानं पूरयत।

**प्रश्नपाठः - 4**

योजनानां सहस्रं तु
.........................................।
.........................................
पदमेकं न गच्छति।।

**पाठ्यचर्योद्देश्यम्।**

कण्ठस्थीकरणसामर्थ्यम्।

**मानसिकव्यापारः**

स्मरणम्, आशयग्रहणं च।

समयः - 2 निमेषाः

अङ्कौ - 2

**मूल्यनिर्णयसूचकाः** उचितरीत्या पूरणाय द्वावङ्कौ।

**उत्तरम् -** शनैर्गच्छेत् पिपीलिका
अचलन् वैनतेयोऽपि

## 5. प्रश्ननिर्देशः।

अधो दत्तेषु प्रयत्नस्य महत्वप्रतिपादकं सुभाषितं लिखत।

**प्रश्नपाठः - 5**

"सर्वं भाग्यायत्तम् इति मत्वा उद्यमरहितो भवितुं नार्हति।" एतत् आशययुक्तं सुभाषितं लिखत।

**पाठ्यचर्योद्देश्यम्।**

आशयावगमनसामर्थ्यम्।

**मानसिकव्यापारः**

आशयग्रहणं, स्मरणं च।

समयः - 3 निमेषाः

अङ्कौ - 2

**मूल्यनिर्णयसूचकाः** निर्दिष्टाशययुक्तस्य सुभाषितस्य लेखनाय द्वावङ्कौ।

**उत्तरम् -** न दैवमिति संचिन्त्य..................।।

## 6. प्रश्ननिर्देशः।

श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

**प्रश्नपाठः - 6**

योजनानां सहस्रं तु शनैर्गच्छेत् पिपीलिका।

अचलन् वैनतेयोऽपि पदमेकं न गच्छति।।

अ. गरुडः इत्यर्थकं पदं किम्?

आ. शनैर्गच्छेत् - पदच्छेदं लिखत।

इ. पिपीलिका कथं गच्छेत्?

ई. 'विनतायाः अपत्यं पुमान्' इत्यर्थकं पदं किम्?

**पाठ्यचर्योद्देश्यम्।**

आशयावगमनसामर्थ्यम्।

**मानसिकव्यापारः**

अपग्रथनं, विवेचनं च।

समयः - 8 निमेषाः

अङ्कौ - 4

**मूल्यनिर्णयसूचकाः** एकैकस्य एकैकोऽङ्कः।

**उत्तरम् -**

| | | | |
|---|---|---|---|
| अ. | वैनतेयः | - | 1 |
| आ. | शनैः + गच्छेत् | - | 1 |
| इ. | शनैर्गच्छेत् | - | 1 |
| ई. | वैनतेयः | - | 1 |
| | **आहत्य** | - | **4** |

## 7. प्रश्ननिर्देशः, प्रश्नपाठश्च।

उद्यममधिकृत्य एकं सुभाषितं लिखत।

**पाठ्यचर्योद्देश्यम्।**

उद्यममहत्त्वप्रतिपादकानि सुभाषितानि परिचिनोति।

**मानसिकव्यापारः**

स्मरणम्, आशयावबोधः।

समयः - 4 निमेषाः

अङ्कौ - 2

**मूल्यनिर्णयसूचकाः** निर्दिष्ट विषयप्रतिपादकस्य सुभाषितस्य लेखनाय एकः अङ्कः।

**उत्तरम् -** योजनानां सहस्रं तु......................।

# एककम् - ५ संस्कृतिः

# पाठः ९ रन्तिदेवस्य कीर्तिः

## 1. प्रश्ननिर्देशः, प्रश्नपाठश्च ।

उदाहरणमनुसृत्य उत्तरलेखनम्।

आदरेण सह सादरम्। एवं चेत्।

सन्तोषेण सह - .............................

**पाठ्यचर्योद्देश्यम् ।**

समस्तपदं परिचिनोति।

**मानसिकव्यापारः**

आशयापग्रथनं, तारतम्यम्।

समयः - 2 निमेषाः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य लेखनाय - 1

**उत्तरम् -** ससन्तोषम्।

## 2. प्रश्ननिर्देशः ।

कोष्ठकात् उचितोत्तरं निर्धार्य लिखत।

**प्रश्नपाठः - 2**

अतीव क्षुत्तृडार्तोऽपि सः धीरतां न तत्याज।

अस्मिन् वाक्ये प्रयुक्तस्य 'तृड्' इत्यस्य समानार्थकं पदं कोष्ठकात् चित्वा लिखत।

(बुभुक्षा, पिपासा, जिज्ञासा)

**पाठ्यचर्योद्देश्यम् ।**

पदार्थज्ञानम्।

**मानसिकव्यापारः**

अपग्रथनम्, अर्थावबोधः, विवेचनं च।

समयः - 2 निमेषाः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य लेखनाय।

**उत्तरम् -** पिपासा।

## 3. प्रश्ननिर्देशः, प्रश्नपाठश्च।

उदाहरणमनुसृत्य लिखत।

उदा - पातुं योग्यं पेयम्। एवं चेत्

भोक्तुं योग्यम् - ........................

**पाठ्यचर्योद्देश्यम्।**

समस्तपदानां ज्ञानम्।

**मानसिकव्यापारः**

अपग्रथनं, तारतम्यं च।

समयः - 2 निमेषाः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकोऽङ्कः।

**उत्तरम् -** भोज्यम्।

## 4. प्रश्ननिर्देशः।

कोष्ठात् निर्धार्य लिखत।

**प्रश्नपाठः - 4**

किं गणे नान्तर्भवति? (श्रुत्वा, उक्त्वा, सन्दृश्य)

**पाठ्यचर्योद्देश्यम्।**

अव्ययपदानि अवगच्छति।

**मानसिकव्यापारः**

अपग्रथनं, विवेचनम्।

समयः - 2 निमेषाः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकः अङ्कः।

**उत्तरम् -** सन्दृश्य।

## 5. प्रश्ननिर्देशः।

सूचनाः अनुसृत्य रन्तिदेवस्य स्वभावं निरूपयत।

**प्रश्नपाठः - 5**

सूचनाः - अतिथिपूजातत्परः - दयालुः - धीरः राजा - दानकर्मणा दरिद्रः - त्यागमूर्तिः हितनिरतः - स्वार्थविमुखः।

**पाठ्यचर्योद्देश्यम्।**

स्वभावनिरूपणसामर्थ्यसम्पादनम्।

**मानसिकव्यापारः**

अपग्रथनं, विपुलनं च।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः**

| | | |
|---|---|---|
| सूचनास्वीकाराय | - | 2 |
| वाक्यघटनायै | - | 1 |
| आशयपूर्णतायै | - | 2 |
| **आहत्य** | **-** | **5** |

## 6. प्रश्ननिर्देशः।

अधो रेखाङ्कितस्य पदस्य प्रयोगसाधुतां विवेचयत।

**प्रश्नपाठः - 6**

'भोज्यं विभज्य एकं भागं <u>तस्मै</u> सादरम् अदात्।'

**पाठ्यचर्योद्देश्यम् ।**

धातुप्रयोगपरिचयसामर्थ्यम्। विभक्तिप्रयोगपरिचयसम्पादनम्।

**मानसिकव्यापारः**

अपग्रथनं, स्मरणं च।

समयः - 2 निमेषौ

अङ्कौ - 2

**मूल्यनिर्णयसूचकाः** दाञ् धातोः योगे चतुर्थी विभक्तिः।

## 7. प्रश्ननिर्देशः ।

कथास्तम्भान् क्रमीकुरुत।

**प्रश्नपाठः - 7**

अ. भोजनसमये ब्राह्मणातिथिः तत्रागच्छत्।

आ. रन्तिदेवो नाम त्यागशाली राजा आसीत्।

इ. कुतश्चित् घृतं, पायसं, जलं च तेन लब्धम्।

ई. रन्तिदेवः त्यागमूर्तिः इति उन्नतपदवीम् आरूढवान्।

उ. आतिथेयः राजा तमपि सबहुमानं स्वीकृतवान्।

**पाठ्यचर्योद्देश्यम् ।**

कथायाः आशयावगमनसामर्थ्यम्।

**मानसिकव्यापारः**

आशयापग्रथनं क्रमीकरणं च।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** उचितरीत्या क्रमीकरणाय एकैकस्य वाक्यस्य एकैकोऽङ्कः।

| | | | |
|---|---|---|---|
| अ. | रन्तिदेवो नाम | - | 1 |
| आ. | कुतश्चित् घृतं | - | 1 |
| इ. | भोजनसमये | - | 1 |

| | | | |
|---|---|---|---|
| ई. | आतिथेयः राजा | - | 1 |
| उ. | रन्तिदेवः त्यागमूर्ति | - | 1 |
| | **आहत्य** | **-** | **5** |

## 8. प्रश्ननिर्देशः, प्रश्नपाठश्च।

मातृकानुसारम् उत्तरं लिखत।

ब्राह्मणश्चासौ अतिथिश्च - ब्राह्मणातिथिः।

तर्हि ................. शूद्रातिथिः।

**पाठ्यचर्योद्देश्यम्।**

समस्तपदपरिचयः।

**मानसिकव्यापारः**

अपग्रथनं, तारतम्यं च।

समयः - 2 निमेषौ

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** शूद्रकः चासौ अतिथिः च।

## 9. प्रश्ननिर्देशः।

उचितविभक्तिरूपेण पदेन रिक्तस्थानं पूरयत।

**प्रश्नपाठः - 9**

धनिकः ...................... धनं ददाति। (याचकः)

**पाठ्यचर्योद्देश्यम्।**

विभक्तिपरिचयः।

**मानसिकव्यापारः**

अपग्रथनं, नूतनसन्दर्भे प्रयोगः।

समयः - 2 निमेषौ

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उचितपूरणाय एकः अङ्कः।

**उत्तरम् -** धनिकः याचकाय धनं ददाति।

## 10. प्रश्ननिर्देशः।

उचितं सम्बोधनारूपं चित्वा लिखत।

**प्रश्नपाठः - 10**

हे पिता, हे पितः, हे पितो।

**पाठ्यचर्योद्देश्यम्।**

सम्बोधनारूपाणां ज्ञानम्।

**मानसिकव्यापारः**

स्मरणं, विवेचनं च।

समयः - 2 निमेषौ

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** समीचीनस्य उत्तरस्य एकः अङ्कः।

**उत्तरम् -** हे पितः।

## 11. प्रश्ननिर्देशः।

सम्भाषणांशान् पूरयत।

**प्रश्नपाठः - 11**

रमेशः - अरे कृष्ण! कुत्र गच्छसि?

कृष्णः - ..........................।

रमेशः - तृश्शिवपेरूर् वा? तत्र किमर्थं गच्छसि?

कृष्णः - ..........................।

रमेशः - अधुना अहमपि सङ्गणकपठनं करोमि।

कृष्णः - तत्र पठनार्थं कियत्रूप्यकाणि आवश्यकानि?

रमेशः - ..........................।

कृष्णः - द्विसहस्रं वा, तदधिकमेव।

रमेशः - यत्किमपि भवतु, पुनर्मिलावः।

कृष्णः - ..........................।

**पाठ्यचर्योद्देश्यम्।**

रचनापाटवं, सम्भाषणचातुर्यं च।

**मानसिकव्यापारः**

आशयावबोधः, आशयप्रकटनं च।

समयः - 10 निमेषाः

अङ्काः - 4

# पाठः १० पृथिव्याः मानदण्डः

## 1. प्रश्ननिर्देशः।

श्लोकं पठित्वा गद्यक्रमं लिखत।

**प्रश्नपाठः - 1**

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधीवगाह्य
स्थितः पृथिव्या इव मानदण्डः।।

**पाठ्यचर्योद्देश्यम्।**

श्लोकं पठित्वा आशयावगनम्

**मानसिकव्यापारः**

आशयग्रहणं, विवेचनम्।

समयः - 4 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः** समीचीनस्य गद्यक्रमस्य लेखनाय द्वौ अङ्कौ।

**उत्तरम् -** उत्तरस्यां दिशि हिमालयो नाम देवतात्मा नगाधिराजः पूर्वापरौ तोयनिधी वगाह्य पृथिव्याः मानदण्डः इव स्थितः अस्ति।

## 2. प्रश्ननिर्देशः।

पट्टिकाकरणम्।

**प्रश्नपाठः - 2**

महाकाव्यं नाटकम् इति भेदेन पट्टिकां कुरुत।

| | | |
|---|---|---|
| अभिज्ञानशाकुन्तलं | रघुवंशम् | विक्रमोर्वशीयम् |
| कुमारसम्भवम् | मालविकाग्निमित्रम् | |

**पाठ्यचर्योद्देश्यम्।**

काव्यनाटकादीनां परिचयसम्पादनम्।

**मानसिकव्यापारः**

अपग्रथनं, विवेचनम्।

समयः - 5 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** नाटकं काव्यम् इति विविच्य लेखनाय एकैकस्य एकैकोऽङ्कः।

**उत्तरम् -**

| ***महाकाव्यम्*** | ***नाटकम्*** |
|---|---|
| रघुवंशम्। | अभिज्ञानशाकुन्तलम्। |
| कुमारसम्भवम्। | विक्रमोर्वशीयम्। |
| | मालविकाग्निमित्रम्। |

## 3. प्रश्ननिर्देशः, प्रश्नपाठश्च।

सूचनाः उपयुज्य हिमालयवर्णनं लिखत।

सूचनाः - हिमालयः - पर्वतराजः - अनन्तरत्नप्रभवः आतपवन्ति शृङ्गाणि - सुगन्धपूरितसानूनि।

**पाठ्यचर्योद्देश्यम्।**

काव्यानि पठित्वा उपन्यासरचनासामर्थ्यम्।

**मानसिकव्यापारः**

अपग्रथनम्, आशयविपुलनम्।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः**

| | | |
|---|---|---|
| सूचनानां स्वीकाराय | - | 2 |
| आशयपूर्णतायै | - | 2 |
| वाक्यघटनायै | - | 1 |
| **आहत्य** | **-** | **5** |

## 4. प्रश्ननिर्देशः, प्रश्नपाठश्च ।

उदाहरणानुसारम् एकं पदं लिखत।

उदा - बालादारभ्य वृद्धपर्यन्तम् आबालवृद्धम्। एवं चेत्।

सेतोः आरभ्य हिमाचलपर्यन्तम् ....................

**पाठ्यचर्योद्देश्यम् ।**

समस्तपदानां ज्ञानम्।

**मानसिकव्यापारः**

आशयापग्रथनं, तारतम्यम्।।

समयः - 3 निमेषाः

अङ्कौ - 2

**मूल्यनिर्णयसूचकाः** उचितस्योत्तरस्य अङ्कद्वयम्।

**उत्तरम् -** आसेतुहिमाचलम्।

## 5. प्रश्ननिर्देशः ।

अधोदत्तश्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

**प्रश्नपाठः - 5**

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः।
पूर्वापरौ वारिनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः।।

अ. अस्त्युत्तरस्यां दिशि इति पदस्य सन्धिच्छेदं कुरुत।

आ. देवतारूपः इत्यर्थकं पदं श्लोकात् चित्वा लिखत।

इ. अयं श्लोकः कस्मात् ग्रन्थात् उद्धृतः?

ई. अस्मिन् श्लोके कः वर्ण्यते?

उ. श्लोकात् ल्यबन्तम् अव्ययं चित्वा लिखत।

**पाठ्यचर्योद्देश्यम्।**

श्लोकं पठित्वा आशयमवगच्छति।

**मानसिकव्यापारः**

अपग्रथनं, विवेचनं च।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकैकोऽङ्कः।

**उत्तरम् -** अ. अस्ति + उत्तरस्यां दिशि।

आ. देवतात्मा।

इ. कुमारसम्भवात्।

ई. हिमालयम्।

उ. वगाह्य।

## 6. प्रश्ननिर्देशः, प्रश्नपाठश्च।

अस्त्युत्तरस्यां दिशि देवतात्मा।

हिमालयो नाम नगाधिराजः। अत्र हिमालयः इत्यस्य विग्रहं लिखत।

**पाठ्यचर्योद्देश्यम्।**

समस्तपदज्ञानम्।

**मानसिकव्यापारः**

अपग्रथनम्।

समयः - 3 निमेषाः

अङ्कौ - 2

**मूल्यनिर्णयसूचकाः** उचितस्योत्तरस्य अङ्कद्वयम्।

**उत्तरम् -** हिमस्य आलयः हिमालयः।

## 7. प्रश्ननिर्देशः।

उदाहरणानुसारं रूपं लिखत।

**प्रश्नपाठः - 7**

आमेखलम् इत्यस्य - मेखलापर्यन्तम् इत्यर्थः। एवं चेद् बालवृद्धपर्यन्तम् इत्यस्य रूपं लिखत।

**पाठ्यचर्योद्देश्यम्।**

समस्तपदानां ज्ञानम्।

**मानसिकव्यापारः**

आशयापग्रथनं, तारतम्यं च।।

समयः - 3 निमेषाः

अङ्कौ - 2

**मूल्यनिर्णयसूचकाः** उचितस्योत्तरस्य अङ्कद्वयम्।

**उत्तरम् -** आबालवृद्धम्।

# एककम् - ६ दैवायत्तं कुले जन्म
# पाठः १३ मदायत्तं तु पौरुषम्

**1. प्रश्ननिर्देशः।**

उदाहरणानुसारम् एकपदं लिखत।

उदा - ज्ञातुम् इच्छुः जिज्ञासुः।

**प्रश्नपाठः - 1**

विजेतुं इच्छुः ..................।

**पाठ्यचर्योद्देश्यम्।**

समस्तपदानां संश्लिष्टपदानां च विवेचनम्।

**मानसिकव्यापारः**

अवगमनं, विवेचनं, तारतम्यम्।।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** विजिगीषुः।

विविच्य उत्तरलेखनाय एकः अङ्कः।

**2. प्रश्ननिर्देशः, प्रश्नपाठश्च।**

उदाहरणानुसारम् एकपदं लिखत।

उदा - मोदेन सह वर्तते इति सामोदम्। एवं चेत्

उपहासेन सह वर्तते इति ..................।

**पाठ्यचर्योद्देश्यम्।**

समस्तपदानां संश्लिष्टपदानां च विवेचनम्।

**मानसिकव्यापारः**

अवगमनं, विवेचनं, तारतम्यम्।

समयः - 1 निमेषः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** विविच्य उत्तरलेखनाय एकः अङ्कः।

**उत्तरम् -** सोपहासम्।

## 3. प्रश्ननिर्देशः।

निर्दिष्टाशययुक्तस्य पद्यस्य चयनम्।

**प्रश्नपाठः - 3**

अधो दत्तेषु परोपकारप्रतिपादकं सुभाषितम् उद्धृत्य लिखत।

विदेशेषु धनं विद्या व्यसनेषु धनं मतिः
परलोके धनं धर्म शीलं सर्वत्र वै धनम्।

परोपकाराय फलन्ति वृक्षाः
परोपकाराय वहन्ति नद्यः।
परोपकाराय दुहन्ति गावः
परोपकारार्थमिदं शरीरम्।।

प्रयत्नःसम्पदां माता
प्रयत्नः परिरक्षकः।
प्रयत्नशीलं सम्पाद्य
महीयन्ते बुधाः भुवि।।

**पाठ्यचर्योद्देश्यम्।**

परोपकारस्य महत्वप्रतिपादकानां सुभाषितानां ज्ञानसम्पादनम्।

**मानसिकव्यापारः**

आशयापग्रथनं, विवेचनम्।

समयः - 4 निमेषाः

अङ्कौ - 2

**मूल्यनिर्णयसूचकाः** उचितश्लोकलेखनाय अङ्कद्वयम्।

**उत्तरम् -** परोपकाराय फलन्ति वृक्षाः।
परोपकाराय वहन्ति नद्यः।
परोपकाराय दुहन्ति गावः।
परोपकारार्थमिदं शरीरम्।

## 4. प्रश्ननिर्देशः।

व्याक्षेपकान् चित्वा लिखतु।

**प्रश्नपाठः - 4**

हा हन्त हन्त नलिनीं गज उज्जहार। - अस्मिन् वाक्ये विद्यमानान् व्याक्षेपकान् उद्धृत्य लिखतु।

### पाठ्यचर्योद्देश्यम्।

व्याक्षेपकानां परिचयसम्पादनम्।

### मानसिकव्यापारः

अपग्रथनं, चयनम्।

समयः - 2 निमेषौ

अङ्कौ - 2

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकैकस्य एकैकोऽङ्कः।

**उत्तरम् -** हा, हन्त।

## 5. प्रश्ननिर्देशः।

गद्यांशं पठित्वा उत्तराणि लिखत।

**प्रश्नपाठः - 5**

महाभारतयुद्धे भीष्माचार्यस्य द्रोणाचार्यस्य च पतनानन्तरं महारथः कर्णः सेनानीरभवत्। तस्य युद्धसामर्थ्यम् अनितरसाधारणम् आसीत्। ततः प्रवृत्ते तुमुले युद्धे अर्जुनं विजिगीषुः सः तं रुरोध। हन्त! तदानीमेव तस्य रथचक्रं भुवि अपतत्। निरुद्धगतिः कर्णः अर्जुनमवदत् "रे पार्थ! तिष्ठ रथचक्रमुद्धर्तुम् अवकाशं मे देहि।" इति।

1. तीक्ष्णम् इत्यर्थकं पदं खण्डिकातः चित्वा लिखत?
2. विजेतुम् इच्छुः इत्यर्थे प्रयुक्तं पदं किम्?
3. निरुद्धगतिः कर्णः अर्जुनं किम् अवदत्?

4. खण्डिकायां प्रयुक्तौ व्याक्षेपकौ उद्धृत्य लिखत।

5. कः अर्जुनं रुरोध?

**पाठ्यचर्योद्देश्यम्।**

गद्यांशं पठित्वा आशयमवगच्छति।

**मानसिकव्यापारः**

आशयावगमः, विवेचनम्।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** उचितस्यैकैकस्य उत्तरस्य एकैकोऽङ्कः।

**उत्तरम् -**

1. तुमुले।
2. विजिगीषुः।
3. रे पार्थ! तिष्ठ रथचक्रमुद्धर्तुम् अवकाशं मे देहि।
4. हन्त, रे।
5. कर्णः।

## 6. प्रश्ननिर्देशः, प्रश्नपाठश्च।

दत्ताः सूचनाः आधारीकृत्य कर्णम् अधिकृत्य पञ्चवाक्यानि लिखत।

सूचनाः - कौरवसेनानी - अस्त्रविद्यापटुः - अर्जुनेन सह द्वन्द्वयुद्धावसरे कृपाचार्यस्य भर्त्सनम् - द्रौपद्याः उपहासः - सर्वदा निन्दितः।

**पाठ्यचर्योद्देश्यम्।**

सूचनानुसारं टिप्पणीं लिखति।

**मानसिकव्यापारः**

आशयविपुलीकरणं, कथास्मरणम्।

समयः - 8 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः**

| | | |
|---|---|---|
| सूचनानां स्वीकाराय | - | 2 |
| आशयपूर्णतायै | - | 2 |
| **आहत्य** | **-** | **4** |

# पाठः १४ मदौद्धत्यम्

## 1. प्रश्ननिर्देशः।

सूचनानुसारं कथां विपुलीकुरुत।

**प्रश्नपाठः - 1**

सूचनाः - निषादबालः - द्रोणसमीपं धनुर्विद्यायै - सामुदायिकनीतिः - प्रतिगमनं - गुरुं मनसि विचिन्त्य पठनं - सफलता।

**पाठ्यचर्योद्देश्यम्।**

कथालेखनसामर्थ्यं सम्पादयति।

**मानसिकव्यापारः**

अपग्रथनम्, आशयविपुलीकरणम्।

समयः - 10 निमेषाः

अङ्काः - 5

| | | | |
|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | सूचनानां स्वीकाराय | - | 2 |
| | आशयं क्रमीकृत्य लेखनाय | - | 1 |
| | पूर्णतायै | - | 2 |
| | **आहत्य** | - | **4** |